श्री वेमगीताप्रथमसहस्रम् ।

SRI VEMAGEETA PRATHAMA SAHASRAM

PART II

ORIGINAL *(Telugu)*

BY

VEMANA

Sanskrit translation by

GANDHAM SRIRAMAMURTY

AND

IRRINKI NARASIMHA MURTY

English translation by

K. NARASIMHA RAJU

PUBLISHER :

SRIRAMA NRUSIMHA GRANTHA RATNAMALA

TOLERU

श्रीरामनृसिंहग्रन्थरत्नमाला 8.

श्रीवेमनयोगीन्द्राय नमः ।

श्री वेमगीताप्रथमसहस्रे उत्तरार्धम् ।

समूलं, आंग्लविवरणसङ्कलितञ्च ।

आन्ध्रमूलम् :— श्री वेमनयोगीन्द्रः ।

संस्कृतानुवादः :— श्रीरामनृसिंहमूर्तिकविवरौ ।

(गन्धं श्रीराममूर्ति, इरिङ्कि नरसिंहमूर्ति ।)

आंग्लविवरणम् :— श्री कलिदण्डि नरसिंहराजु ।

—: प्रकाशिका :—

श्रीरामनृसिंहग्रन्थरत्नमाला

तोलेरु :

1961.

[मूल्यम् रु. ३/-

ग्रन्थप्राप्तिस्थानम्:—

श्रीरामनृसिंहग्रन्थरत्नमाला,
तोलेरु।
(Via) वीरवासरम्,
पश्चिमगोदावरिजिल्ला, आन्ध्रप्रदेश्

श्रीशारदामुद्रणालये मुद्रितम्।
भट्टनविल्लि, अमलापुरं तालूक
प्राग्गोदावरिजिल्ला।

श्री वेमनयोगीन्द्रः ।

श्रीमत्सनत्कुमारांशं वेदवेदाङ्गवेदिनम् ।
दिगम्बरं कुमाराभं स्तुवो वेमाख्ययोगिनम् ॥

May our praise go unto Vemana,
The spirit of Sanathkumara reborn,
The yogin full of the Vedic lore,
Who, innocent like a child, no clothing bore.

विज्ञप्तिः ।

वेमन-जीवित-संग्रहः ।

पुराकिल वेमनाख्यो महायोगी सुबोधान्ध्रभाषायां पद्यरूपेण ऐहिकामुष्मिकविषयान् सर्वान् मानवलोकाय सम्यक् न्यबोधयत् । तान्येव पद्यानि 'वेमगीता' इत्याख्यया गैर्वाण्यां वाण्यां अनुष्टुप्छन्दसा आवाभ्यामनूदितानि । आन्ध्रभाषायां 'अन्न' इति पदमादरसूचकम् । ततो वेमः 'वेमन्न' इति प्रथितो बभूव । 'वेमन' इति च तद्रूपान्तरमस्ति । वेमनकविरान्ध्रदेशे कोण्डवीडुनाम्नि पट्टणे क्री॥ श॥ चतुर्दशशताब्दे नन्दनकार्तिकशुक्लपौर्णमास्यां षडशीत्युत्तरत्रयोदशशततमवत्सरादारभ्य षण्णवत्युत्तरत्रयोदशशततमवत्सरपर्यन्तं कोण्डवीडुराज्यं पालयतः कोमरगिरि वेमभूपालात् मल्लमाम्बायां तृतीयपुत्रोऽजनि । अयमेव षण्णवत्युत्तरत्रयोदशशततमवत्सरादारभ्य चतुर्विंशत्युत्तरचतुर्दशशततमवत्सरपर्यन्तं राज्यं परिपालयतः अनवेममहीपालस्य कनिष्ठसोदरो भूत्वा बम्मेर पोतनामात्यस्य सहाध्यायी सन् सहजप्रतिभया विभ्राजमानः सोमशेखराख्यगुरुशुश्रूषया संस्कृतान्ध्रभाषासाहितीमनर्गळां सम्पाद्य विविधराजभोगाननुभूय स्वसमक्षमेव विंशतिहायनेषु संवृत्तं राज्यपतनमुद्वीक्ष्य मनःपरिपाकेन पुराकृतसुकृतविशेषेण च सम्भूतसमग्रवैराग्यः कालवशात् घटनावशाच्च हृदयकुहरोत्थितं भावोद्रेकमेव पद्यरूपेण व्यक्तीकुर्वन् सहस्रशः पद्यान्युपगीय अन्ते कटारुपल्लीनाम्नि ग्रामे शार्वरि चैत्र शुक्ल नवम्यामष्टषष्टिवर्षीयो भौतिकशरीरमुत्सृज्य परं पदं प्रापेति प्रतीतिः ।

साहिती – तत्त्वाभिश्च ।

संस्कृतीयौ शूद्र. पालकशब्दावान्ध्रभाषायां 'रेड्डि, कापु' इति व्यवहृतौ स्तः। तत एव भूकुटुम्बगणाः 'भूपाल्' इति बिरुदनाम्ना व्यवह्रियन्ते। कोण्डवीडुसंस्थाने रेड्डिमनवंशीयानां भूपालकनामव्यवहृतिर्वेमभूपाल्, कृष्णभूपाल् इत्यादिनामभिः व्यक्तीक्रियते। वेमनकुटुम्बस्थः पेदकोमटिवेमनाख्यः शृङ्गारदीपिकासमाख्यां अमरुककाव्यस्य संस्कृतव्याख्यां सप्तशतीसारसमाख्यां गाथासप्तशतीव्याख्यां च व्यरचयत्। अस्य पेदकोमटि वेमनाख्यस्य जीवितचरितं वेमभूपालीयनामान्तरेण प्रथितं पार्वतीपरिणयाख्यसंस्कृतनाटककर्त्रा वामनभट्टनामधेयेन विरचितम्। तथा कुमारगिरिभूपालो वसन्तराजीयाभिधेयं संस्कृतकाव्यं विरचयामास। कुमारगिरेर्जामाता काटायवेमनाभिख्यः कालिदासरूपकाणां व्याख्यां विलिलेख। तत एतत्कोण्डवीडुरेड्डिसंस्थानाधीशाः संस्कृतान्ध्रयोः कृतिकर्तारः कृतिभर्तारश्च बभूवुरिति व्यक्तमेव। तस्मात् वेमनयोगी च संस्कृतान्ध्रभाषाद्वितयेऽपि विद्वान्निरुक्तिः निर्विवादैव। अतएव एर्रापग्गड, श्रीनाथाद्यान्ध्रकविवरेभ्य एतत्संस्थानमाश्रयमदात्। वेमनकविरान्ध्रवाङ्मयच्छन्दसि संस्कृतवाङ्मयगतानुष्टुप्छन्दस्तुलितेषु ललितेषु विशालभावकलितेषु आटवेलदिनामकपद्येषु अनुपमवेदवाक्यानि प्रकटीकृत्य स्वकीयां प्रतिभामान्ध्रलोके प्राचीकटत्। केवलपारिभाषिकपदगूढं सर्वोपनिषत्सारं वेदान्तशास्त्रं सर्वसाधारणव्यवहारभाषायां व्यक्तीकृत्य महाजनादृतिं प्राप। वेमनकवे रचनायां तत्र तत्र 'मानिनीमनोजमन्दिरानन्दैकलोलुड्डु, ऊर्ध्वलोकसुखमु, आभिजात्यमदमु, विश्वदाभिराम' इत्यादयस्संस्कृतपद-

प्रयोगास्सन्ति । तथापि प्रायशः संस्कृतभगवद्गीतेव आन्ध्रभाषायां सर्वसुबोधफणित्या वेमनकविता राजते । अपि च तत्र तत्र ज्ञ–क्ष, त्र–प्राण, ऋग्यजु–योग्य, इत्यादिलाक्षणिका यतिविशेषास्सन्ति । प्रकृतिरूपयोः गृहगेहशब्दयोः विकृतौ 'गीमु' इति व्यवहृतिरेवास्ति । किन्तु वेमनकविः 'गुरमु' इति च व्याजहार । एवमादिविषयाः पाठकानां सर्वत्र विशदा भवन्ति ।

वेमनाख्यो महायोगी 'कुत्राऽजनि? कस्यां भाषायां गीतालापमकरोत्?' इत्येवंरूपेण विवादेनालम् । तद्गीतासार एवास्माभिरास्वाद्यः । वेमनकविनाऽऽशुधारया तां तां परिस्थितिमनुसृत्य सद्य एव गुम्फितानि पद्यानि लेखनसौकर्यरहिते तस्मिन्काले केवलभावकुसुमसौरभाघ्राणलोलुपशिष्यालयः कियन्मात्रं निर्दुष्टं धारयितुं शक्नुवन्ति? विचिन्तयन्तु । केचन एतत्त्रमसत्यमनालोचयन्तः 'वेमस्य भावभाषादयो न समीचीनाः' इति वृथा तन्निन्दया तृप्तिमन्तो दृश्यन्ते । सर्वमेतदहं ममेत्यनुसन्धानसहितमेव । 'तत्र ममेत्यनुबन्धमसज्जडदुःखात्मकं शवरूपं च । अहमित्येतत् वस्तु सत्यज्ञानानन्दात्मकं शिवरूपं च' इत्येव वेमनयोगी मुहुर्मुहुः स्वप्रोक्तपद्येषु प्रतिपादयामास । मङ्गळपदपर्यायशिवशब्दव्याहृत्या जातिमतातिगं वेमनयोगिनं शैवमतस्थं मत्वा केचन निन्दन्ति । विना फलापेक्षया परसन्तुष्टिमनुद्दिश्य पराभिप्रायदास्यमनवलम्ब्य अस्थिरबाह्यसौख्यमतीत्य शाश्वतान्तरसौख्यमेव वाञ्छतः अध्यात्मगीतिकां गायतः कविकोकिलस्य लोककृतदूषणभूषणादिभिः का वा हानिः ? को वा लाभः ?

आन्ध्रप्रदेशे सम्यगान्ध्रसंस्कृतभाषानुभूतिमर्जित्वा भक्तिज्ञानघनौ प्रशस्तपदपद्यकवी भूत्वा 'स्वयं तीर्णः परांस्तारये' दिति न्यायानुसारेण स्वयं तीर्णौ लोके सूक्तिबीजविक्षेपं कृतवन्तौ त्यागय्य वेमननामधेयौ सर्वेषामपि चिरस्मरणीयौ। 'त्यागय्यः नारदांशसम्भूतो वेमनः सनत्कुमारांशसम्भूतः' इति प्रतीतिरप्यस्ति। त्यागय्यमहात्मनः पदसाहित्ये कैवल्यगानकलारिरंसुभ्यो गायकजनेभ्योऽग्रांशरूपं प्रापिते आधुनिकाः संस्कृतान्ध्रभाषावेत्तारः तन्निर्दुष्टं कृत्वा सर्वोपनिषत्सारमिति जुघुषुः। पदसंख्यापि षोडशसहस्रपरिमिता लब्धा। वेमनयोगिनस्साहित्यमपि तथैव विभ्रंशितमभूत्। क्री॥ श॥ पञ्चविंशत्युत्तराष्टादशशततमवत्सरादारभ्यैव महतां महता यत्नेन 'वेमनाख्यो महायोगी कविः पण्डितश्च' इति लोके परिचितोऽभूत्। वेमनकवेः पद्यानि द्राविडकर्णाटांग्लप्रष्यादिभाषासु परिवर्तितान्यभूवन्। श्रीमतां सि. पि. ब्रौन्, क्याम्बिल्, माक्लिन्, त्यागरायशेट्टिकम्पेनी, वाविल्लकम्पेनी, पञ्चाग्नुल आदिनारायणशास्त्रि, वेङ्कटपार्वतीश्वरकवुलु, शेषाद्रिरमणकवुलु, वरदाचार्युलु, वंगूरि सुब्बाराव्, कट्टमञ्चि रामलिङ्गारेड्डि, कूर्म वेङ्कटरेड्डिनायुडु, रघुपति वेङ्कटरत्नंनायुडु, राल्लपल्लि अनन्तकृष्णशर्मप्रभृतीनां आन्ध्रभाषाभिमानिनां महात्मनां महोद्यमेन वेमनकविसाहितीमहिमा अस्मद्दृष्टिपथमाजगाम। वेमनपद्यानि पञ्चसहस्राणि लब्धानि। व्यावहारिकग्राममभिव्यक्तानि महात्मनां वाक्यानि संस्कृतभाषायां परिवर्तितानि गण्यतां यान्ति। ततः तेषु प्रतिसहस्रं संस्कृत्य संस्कृतभाषायामनुष्टुप्छन्दसा लोके प्रकटयितुमावयोस्सङ्कल्पोऽजनि। तदनुसारेण वेमगीतायां प्रथमसहस्रं प्रकटय्य महाजनेभ्यस्सम्यगर्पितम्। एत-

स्प्रथमसहस्रस्य श्रीवाविल्लमुद्रणालयोदितग्रन्थएव मातृकात्वेन गृहीतः। कृपया यदि सहृदया अत्रत्यान् गुणदोषान् सूचयेयुः तर्हि द्वितीय-मुद्रणे द्वितीयसहस्रे च तत्सूक्त्यनुसारेण संस्कर्तुं यतिष्यावहे।

पञ्चदशशताब्दानन्तरं मल्हणचरित्रकर्ता एडपाटि एर्रापगडः, एकाम्रलिङ्गशतककविर्लक्ष्मणः, तोम्यचरित्रकर्ता पिङ्गळि एर्रनार्यः, अन्य-वादकोलाहलग्रन्थकर्ता शिवयोगीन्द्रः, नागरखण्डरचयिता तुरगा रामकविः इत्यादयः केचन आध्यात्मिककवयएव स्वस्वग्रन्थादौ वेमनकविं तुष्टुवुः। शृङ्गारप्रबन्धकवयस्तु न तथा।

शृङ्गारकविस्तु पामरजनग्राह्यं शृङ्गाररसमेवाभिवर्ण्य तद्रस-पिपासून् प्रभून् प्रजाश्च समाकृष्य धनं हृत्वा भोगलम्पटो भवेत्। आध्या-त्मिककविस्तु यद्यद्वस्त्वस्ति तत्र 'नित्यं किमनित्यं किमिति, सत्यं किमसत्यं कि' मिति च सविमर्शं विदित्वा आत्मरतो भूत्वा लोके सद्रूपं नित्यरूपं वस्तु प्रकटयति। किन्तु प्रभुभ्यो वा प्रजाभ्यो वा धनभोगादिकं नेच्छति। ततः आध्यात्मिककविं विज्ञाय आदृतवन्तः प्राज्ञा अतिविरळास्सन्ति। तत्रेदं निदर्शनं पश्यत। आध्यात्मिक-कविः 'यापिच्छरीरे चक्षुः श्रोत्रं घ्राणं उरः पाणिपादं इत्यादयः अव-यवाः सर्वे मांसवसादिविकारा रक्तपूरिता मज्जामेदोऽस्थिश्लेष्मादि-कासह्यवस्तुसमवायसम्भरिताः तस्मात् त्वं स्त्रीलोलुपो मा भूः' इति विरक्तिमार्गं बोधयति। शृङ्गारकविस्तावत् 'स्त्रियश्चक्षुषी पद्मपत्रे, कण्ठः शङ्खसन्निभः, यानं हंसयानसमानं, वचांस्यमृतमयानि, अध-रोष्ठलालाजलममृतमेव, सेयं तव आराध्यप्रेमदेवता' इति वर्णयन् प्रागेव मोहाब्धौ स्वतो निमग्नं पुरुषं पौनःपुन्येन मोहे निमज्जयति। सोऽपि

अज्ञानाद्धेतोः तदुक्तिमभिनन्द्य तस्मै बहुळं वित्तं दत्त्वा स्वयमधोगतिं प्राप्नुयात् । अन्धः अन्धाश्रयेण गर्ते न पतति किम्? विषदिग्धस्य नरस्य तिक्तरसः मधुरइव वर्तते । तथैव मोहग्रस्तस्य लालाजलं अमृतं किं न स्यात्? । स्त्रीणामवयवेषु पद्मपत्रशङ्खादिउपमानवस्तून्या-रोप्य स्त्रीमोहे संसक्तो भवति । न पुनस्तेषु रम्योपमानवस्तुषु ताव-न्मात्रमानन्दं प्राप्नोति । अपि च आत्मनो व्यामोहेन केवलस्त्रीपुरुष-व्यवस्थया नातिसन्तृप्तः समुद्रपर्वतमेघचन्द्रगुरुबुधादिष्वपि पुंस्त्वं नदी-भूमितारादिषु स्त्रीत्वं च आरोप्य कथाः निर्माय स्वयं भ्रान्तो भूत्वा लोकं भ्रामयति । प्रेम्णि सुखमस्तीति वदति । किन्तु तत्प्रेम स्त्री-पुरुषशृङ्गारक्रीडासु परिमितं करोति । मातृप्रेम विश्वप्रेमादिसहज-निष्कलङ्कप्रेम तस्य दृष्टिपथं नायाति । वस्तुतः प्रभवः पण्डिताश्चैव लोकोद्धरणसमर्थाः, यद्येते पतिता भवेयुः तदा लोकस्य अधोगतिं विना किमस्ति? बुद्धाशोकादीन् द्वित्रान् वर्जयित्वा बहवः प्रभवो दुर्व्य-सनलोलुपा एवेत्युक्तिः सत्येतरा न भवति । यथा पाश्चात्या भौतिक-शास्त्रज्ञानकुशलाः तथा तत्त्वशास्त्रे भारतीयाः पण्डिता इति वचनं विनाध्यात्मिककवीन् केवलशृङ्गारकविषु वृथारोपितप्रभावकविषु वा कथं रूढं भवेत्? ।

आध्यात्मिककविः लोके राजाश्रयमनादृत्य दैवमेव शरणमिति चिन्तयन् दैवबलेन-विरुद्धप्रवृत्तिमुपशमयन् आत्मनैव आत्मनि रमते । सामान्यलौकिकज्ञानयुतः प्रभुर्वा जनो वा लोकातिगं तं कथं आद्रि-यते? प्रभूणां मनस्तत्त्वमेव उपलक्ष्य रचनां कुर्वते कवयेऽनेकाग्रहारादि-दानैः प्रभुमत्कारसिद्धयति । लोकपरिपाटिरेतादृशी ।

वेमनकविः स्वकवितायां सहजोपमालङ्कारादिचमत्कृतिं दर्शयामास। तथापि सि. पि. ब्रौन्प्रभृतिभिः लोकज्ञै रचिताभिरांग्लादिव्याख्याभिरेव वेमनकविः स्वसाहित्येनसह विद्याधिकानां दृक्पथमाजगाम। नोचेद्वेमनसाहित्यस्य का वा गतिस्स्यादिति न विद्मः।

वेमनयोगी स्वयमेव वक्ता स्वयमेव श्रोता च भूत्वा 'सर्वं खल्विदं ब्रह्मेति' सूत्रानुसारेण ज्ञानं लोके सर्वत्र प्रकाशयामास। तत एव वेमनपद्यानि आत्मबोधामृतरूपाणि, सर्वोपनिषत्सारभूतानि, सद्योमोक्षप्रदानीति च व्यवह्रियन्ते।

अपि च प्रकृतिपरिशीलनशक्तिः, सृष्टितत्त्वविज्ञानं, शब्दशास्त्रपरिज्ञानं, भावसंशुद्धिः, कल्पनाप्रौढिमा, वर्णनाचातुरी, उपमानसन्धानपाटवं, प्रभुमित्रकान्तासम्मितबोधनं, वास्तविकस्थितिग्रहणं, वचस्सौलभ्यं, सहजधारा, लोककल्याणाशयः इत्यादयः अन्ये च गुणाः कविजनाश्रया वेमनकविपुङ्गवे द्योतन्ते।

एकदा विश्वमानवहृदयकुहरेषु यो वेद आनन्दचन्द्रिकाः प्रसारयामास, तस्य प्रभावः, यश्च तदा प्रतिष्ठितार्यपवित्रधर्मविजयध्वजः तस्य प्रभावश्च क्रमेण कालगर्भेऽस्तमितोऽभूत्। केवलपामरजनग्राह्यपौराणिकाचारास्सर्वत्र व्याप्ता बभूवुः। तत आर्याणामाध्यात्मिकशक्तिः पुरुषार्थप्रवणता च विनष्टासीत्। तत्त्वज्ञानं विनश्य मिथ्याज्ञानं ववृधे। अन्योन्यसहकाराभावेन प्रकल्पितगुरुलाघवभावेनासूयापि लोके प्रवृद्धा। आत्मतन्त्रा या भारतीयार्यजातिः पुरैकदा यावत्प्रपञ्चस्य स्वातन्त्र्यसन्देशमदात्, सैव भावदास्यवशा भूत्वा निर्वीर्याऽभवत्। अनुश्रूताचारवशात् श्ववृत्तितुल्या सेवावृत्तिः आर्यजातिं कृपणां कृत्वा अपयशःपङ्के

न्यपातयत् । भूयो वास्तविकदिव्यतत्त्वज्ञानदीधितयो यदा दिक्षु भासन्ते तदैव आर्यजातेः दास्यविमुक्तिः भवति। तत्त्वज्ञानमेव पारतन्त्र्याब्धितरणे नौकायते। तस्य विशेषतः प्रजातन्त्रेण आलम्बनेन भवितव्यम्।

अस्य वेमनयोगिनः तत्त्वशास्त्रे मनश्शुद्धिविरहितमूर्तिपूजातीर्थयात्राश्राद्धाद्याचाराणां च स्थानं न दृश्यते। विना दैवोपास्ति, विना सत्कर्माचरणं साक्षाद्देवएवावतीर्य प्रजानां कष्टनष्टानि व्युदस्यतीति अलसानां मिथ्यावादस्य प्रसक्तिर्नास्ति। सत्यशान्त्यहिंसादयाशौचदैवचिन्तादिसद्गुणानां नित्याचरणे यदा स्थानं कल्पयितुं शक्नोति, तदैव तेषां सार्थकता भवतीति एतस्य परमलक्ष्यम्। निखिलप्राणिकोटिषु मानवएव सत्यासत्ये वस्तुतत्त्वं च विमृष्टुं समर्थो बुद्धिमांश्च खलु? आत्मनः कष्टकाले करावलम्बं दत्वा आनन्दभोगानुभवार्थं सर्ववस्तुजातं कल्पयित्वा साहाय्यं कुर्वतो विश्वस्य विश्वसाक्षिणो विश्वेश्वरस्य कृतज्ञताप्रदर्शनमेव मानवस्य नित्यव्रतं हि। आत्मसाक्षिगुरुबोधेन निवृत्ताज्ञानतमसः सन्तः ज्ञानभानूदयेन तत्त्वं गृहीत्वा बन्धैः दुःखैश्च विमुक्ताः शाश्वतानन्दपरिपूर्णाश्च भवितुं स्वस्वरूपानुसन्धानसाधनमेवैतद्ग्रन्थलक्ष्यम्।

अमलिनेन चित्तेन एतद्ग्रन्थस्थविषयान् स्वीकृत्य प्राज्ञाः इतोऽधिकपवित्रग्रन्थरचनायै आवयोः धृत्युत्साहौ चिकीर्षवः आशीर्भिः अनुगृह्णन्तु भवन्त इति बुधान् प्रार्थयावः।

श्रीरामनृसिंहमूर्तिकवी

(गन्धं श्रीराममूर्ति, इरिङ्कि नरसिंहमूर्ति।)

श्रीरामनृसिंहमूर्तिकविवरौ ।

(शतावधानिनौ, उभयभाषाप्रवीणौ, गद्वालसंस्थानास्थानपण्डितौ)

श्रीवृद्धद्रुक्कदार्तिसंहरणकृद्योगो ययोर्वर्तते
लोकाराधनतत्परौ खलजनव्यापादनव्यापृतौ
लोकेस्मिन्नवतेरतुस्सुमहितौ शान्तोग्ररूपौ च यौ
तौ श्रीरामनृसिंहमूर्तिविलसत्संज्ञौ जयेते तराम् ॥

Blessed be the twain incarnations
Of graceful Rama and terrible Narasimha,
Who, like the sacred Sri, symbolise
The two-faceted Sovereign Power
That conserves what is good and lovely
And destroys what is evil and ugly.

AN APPEAL

VEMANA'S LIFE AND TEACHINGS

The poet-sage, Vemana embodied his moral and philosophical teachings in simple verses, using the popular Telugu idiom of his day, for the enlightenment of the masses steeped in ignorance. We now place before the reading public a Sanskrit rendering of those verses into the *anustup* metre.

In the Telugu language "anna" is a term of endearment. Thus Vema has come to be affectionately called Vemanna or Vemana.

He was born at Kondavidu on the full-moon day of the month of Kartika in the year Nandana of the fourteenth century of the Christian era. His mother was Mallamamba. He was the third son of King Komaragiri Vema who ruled over the territory of Kondavidu from 1386 to 1396 A. D., and the youngest brother of King Ana Vema who succeeded his father in 1396 and held sway till 1424 A.D. Tradition has it that Vemana was a co-disciple to the great poet, Bammera Potana under Soma Guru with whose aid he drank deep in the literatures of Sanskrit and Telugu and that after enjoying princely pleasures for about twenty years and having seen the decline and fall of the Reddi Kingdoms he became disillusioned and having renounced all material entanglements, lived a life of unblemished spirituality singing his mundane and spiritual experiences till he finally laid down his earthly body at the village of Katarupalli at the age of sixty eight years on the twenty fourth day of the month of Chitra in the year Sarvari.

LITERATURE AND ITS EXTENT

In Telugu the words "Reddi' and 'Kapu" mean the same as the Sanskrit words "Raat' and 'Palak" (Ruler and protector). From the suffix of Bhupala associated with the names of Vema and Krishna Rama as Vema Bhupala and Krishna Rama Bhupala, it is evident that the names of the members of the ruling dynasty of Kondavidu to which our Vemana belonged were suffixed, as a matter of course, with the honorific term, *Bhupala.*

Peda Komati Vemana,the author of the Sanskrit commentary called Sringara Deepika on the 'Amaruka Kavyam', and of the 'Sapta Sati Saram', commentary on the Gadha Sapta Sati came fromVemana's family.Vamana Bhat the reputed author of the Sanskrit drama, "Parvateeparinayam", popularised the life-story of Peda Komati Vemana through his work, called Vemabhupaleeyam. Kumaragiri Bhupala wrote in Sanskrit the well-known Vasantarajeeyam. Kumaragiri's son-in-law, Kataya Vema is the author of Sanskrit commentaries on the dramas of Kalidasa. The ruling Reddi family of Kondavidu was thus resplendent with renowned scholars and reputed poets. It was owing to the cultural eminence of this family that the court of Kondavidu held an attraction to such great Andhra Poets like Erra Praggada and Srinatha. These facts prove indisputably that Vemana was himself a scholar of no mean order in Telugu and Sanskrit

The Telugu metrical form called " Ataveladi" helped Vemana to bring out his profound thoughts with natural ease and elegance as the *Anustup* metre provided a means of straight and unhindered expression to Sanskrit poets. He enshrined the most intricate and abtruse metaphysical ideas of the various Upanishads and other philosophical

treatises in the simple and popular spoken idiom of his day. His skill in the art of employing simple but meaningful expressions excites the admiration of scholars. No doubt in his writings we meet here and there, with high sounding Sanskrit words and phrases as *Manineemanoja mandiranandykaloludu* (revelling in thoughts and acts of unbridled concupiscence), *Urdhvaloka sukhamu* (the happiness of heavenly life) *Abhijatyamadamu* (Pride of blue blood) and *Viswadabhirama*, (Beloved of the Universal Benefactor) Nevertheless his Telugu style is suave and simple as the Sanskirt diction of the Bhagavadgita. There are also a few examples of intricate rhymings which the writers on poetics usually refer to-such as the rhyming of *jna with mka* of *A* with *Prana* and of *Rigyazu* with *Yogya*. While the rest of the Telugu writers hold *geemu* as the Telugu derivation of the Sanskrit words *griha* and *geha*, Vemana spells it as *guramu*. These peculiarities come prominently to the notice of the readers throughout his writings.

However, the questions of Vemana's descent and locale or the peculiarities of his poetic diction are not of primary interest to us. Our object of enjoyment is the priceless wisdom clothed in his verses. He was not a poet by profession. His songs burst forth from the depth of his soul under a natural impulse dynamised by unusual and insufferable circumstances. The main repository of the impromptu verses was the untrained memory of his disciples who gathered around him, not to become pandits of literature, but merely to be enlightened by his teachings. When such were the conditions, when writing materials were too meagre to be thought of, it is quite probable that his original verses might have suffered, in course of time, from many alterations, interpolations and excrescences. Failing to recognise

even this naked truth,some derive satisfaction in deriding Vemana's ideas as queer and his language as unelegant.

The self and ego permeate all the phenomena. The ego projects itself out as dead matter and is unreal, while the self constituting truth, knowledge and bliss is real. This basic truth is explained very frequently in Vemana's verses. He denounced casteism and religious sectarianism with all the vehimence of his nature; yet, there are some persons who do not hesitate to read Saivite Sectarianism into his verses from the occurrence of the word Siva, eventhough the poet used it merely to connote grace and auspiciousness. What does praise or abuse matter for such a sage who cared little for his mundane existence or physical pleasures and who was too engrossed in the contemplation of the spirit to find time to court adulations or shun indictments ? As a cuckoo breathes forth its melodies from the natural springs of its heart, so did Vemana sing his spiritual songs without the slightest tinge of self-conceit.

Every Andhra knows Thyagayya and Vemana as the torch bearers of spirituality, who not only realised the highest ideal of their earthly existence, but worked for the emancipation of the ignorant by disseminating seeds of wisdom - the one through his musical songs and the other through his metrical verses. According to a traditional belief, Thyagayya was born of the spirit of Narada and Vemana of that of Sanathkumara. The songs of Thagayya got into the mouths of persons whose enthusiasm for music was not matched by a regard for literary proprieties and acquired several blemishes which have since been cleared by the labours of Telugu and Sanskrit scholars. The songs collected by these scholars now number more than sixteen thousand and it is admitted

that they contain the essence of the Upanishadic wisdom. The literature of Vemana met with the same fate as that of Thyagayya. Nevertheless, since 1825, renowned scholars have done their best to recover and resuscitate the writings of Vemana and through their labours he is now widely known as a poet and a scholar. His verses have been translated into Tamil, Canarese, English, Persian etc. Scholars like C. P. Brown, Cambell, Macclin Panchagnula Adinarayana Sastri, Venkata Parvateeswara Kavulu, Varadhacharya, Vanguri Subba Rao, Kattamanchi Ramalinga Reddi, Kurma Venkatareddi Naidu, Raghupati Venkataratnam Naidu and Rallapalli Ananta Krishna Sarma, and Publishers like Thyagaraja Chetty Company and Vavilla Company have worked hard to bring to our notice the beauties of Vemana's literature. His verses, which have been collected so far, number more than 5000.

The noble sayings of great men have gained wider publicity by being translated into Sanskrit. Therefore we have thought it desirable to revise and translate into Sanskrit, in the *anustup* metre, the verses of Vemana and publish them in batches of a thousand each. We now place in the hands of readers the first volume containing one thousand verses under the title, VEMAGITA. Our source-book for these verses is the edition published by the Vavilla Press. We invite suggestions from generous readers. The errors that might have crept into the present edition would be rectified in the next one.

Subsequent to the fifteenth, century some of those poets who treated philosophical subjects have commemorated the name of Vemana in their books with a sense of admiration for him. They are Edapati Errapraggada,

the author of Malhana Charitra', Lakshmana kavi, the author of 'Ekamralinga Sataka', Pingali Erranarya, the author of 'Thobhya charitra',Sivayogeendra, the author of 'Anyavada Kolahala' and Turaga Rama Kavi, the author of 'Nagara Khanda'. No writer of romance has referred to the poet-sage.

Ordinarily, the writers of romance write to feed their patrons with coprological themes for earning earthly reward. The poets who deal with spiritual matters use their artistic inspiration as an aid to themselves for contemplating truth and untruth and as a means for illuminating the souls of the ignorant by infusing into them a sense of the Eternal. The spiritualist, who pays scant attention to the earthly potentate and to the rewards and honours he may bestow, often suffers from neglect and oblivion.

To the spiritualist the various limbs of the body are just what they are-made up of so much flesh and blood, phlegm and lymph and fat and bone- and his injunction is to beware of Cupid's poisonous arrows. To the romantic poet the eyes are beautiful like lotuses, the gait is graceful like the swan's, the neck is shaped like the conch, the words are sweet like honey, and from the lips springs the very ambrosia which is the mead of Gods; and his suggestion is that the titillation of love should be the desideratum of life.

Such erotic poets play upon the natural weakness of man and madden him more and more until he reaches a stage where redemption is impossible. If a blind man chooses another of his kind for his guide, in no time will both land themselves in a ditch. What is sour, tastes sweet in the mouth of a cobra-bitten man. Similarly, the deluded mind tastes ambrosia in the gall of saliva.

It cannot see the natural beauty of the lotus and conch but in the context of its sexual conception. Sex is so pervasive that man projects it in his mental associations even to the inanimate objects like the sun and the moon and the mountains and the earth. When he says that love is blissful should he not take into its purview the selfless love of the mother and the father? Why should he delimit its range to the propensities of sex alone?

The rulers and scholars alone can lift humanity from the slough of ignorance. If they have lost their bearings and fallen into degradation, what will be the fate of the common man? It is not far from true that the rulers of mankind with the exception of a few like the Buddha and the Emperor Asoka, have wasted their lives in sin and sensuality. If the spiritualist-poets are left out of the picture, can our romantists who are enjoying an unduly inflated importance substantiate the common belief that the Indians have done so much for development of metaphysical sciences-as the Westerners for the physical sciences?

The spiritualist-poet cares little for the protection that an earthly ruler can afford. God is his prop; he lives always in communion with the Omnipresent Bliss having subdued the conflicting elements of his nature. How can the ruling magnates or their subjects, whose knowledge is limited to a few worldly matters understand and appreciate the transcendentalist? The poets that could bend their thought currents to suit the tastes of the rulers have come to enjoy their gifts of free-holdings and other rewards. This is the state of affairs in our topsyturvy world.

Though the poetry of Vemana is full of literary graces and figures of speech like similes and metaphors,

it was not till his works had been translated into different foreign languages, by well-informed scholars like C. P. Brown, that the poet and his poetry came to the notice of our intelligentsia. We can well imagine what would have happened to this literature if those scholars had not spent their labours on the subject.

Addressing himself as his own listener, Vemana popularised through his verses the highest transcendental wisdom culled from the Upanishadic lore. The basic truth explained in his writings is that the objective world is but a manifestation of Brahman.

We see in Vemana's writings a keen eye for the beauties of nature,a deep knowledge of the creative processes, a scholarly treatment of the language, a cultivated purity of thought, a pleasant imagination, an ability for picturesque portrayal, a dexterity in handling similies, a power to reach the readers' sensibility, a clear understanding, a simple and natural expression and an unswerving devotion to the service of humanity—these are the qualities that go to make a true poet.

The great Vedic lore that had once filled the human mind with light and joy and the banner of the Aryan Dharma,that had once flown aloft, lost their chastening influence and, as ages passed, fell into utter oblivion giving place to the polity of the *Puranas* which required no strenuous effort to understand or follow. This transition resulted in the loss of the spiritual energy and the social solidarity, which were characteristic of the Aryan race. Real wisdom fell to ruins wherefrom sprang up chimerical fancies. The ideas of human equality and fraternity disappeared giving rise to social inequalities, intolerance and friction. The Aryan race,that once held the torch of freedom of thought and action,

stooped to imbecile imitation. Blind orthodoxy superseded reason and the most despicable intellectual slavery throttled the soul and hurled down the race from its pedestal of glory. The race cannot come to its own, until it eschews all the delusions born of ignorance and inertia, and revitalises itself with the manna of true wisdom. It is that true wisdom that the reader should crave for.

In the ideal world of Vemana, there is no place for hypocritical idolatries, thoughtless pilgrimages and ritualistic formalities. He did not subscribe to the belief that God would automatically take an incarnation for the easy redemption of lazy persons. He taught, again and again, that man's path to his redemption lay through truth and nonviolence and his own mercy and self-realisation. Of all the creatures man alone is endowed with the faculty of critical reasoning for distinguishing truth from untruth. Should he not be grateful to the all-pervading - Omniscent Lord who is the ever wakeful protector in times of distress and the all-giving Beneafctor in times of need ?

The aim of this book is to help the seekers in liberating themselves from the bonds of ignorance and illuminating their path with wisdom on their march to self-realisation. We hope that the blessings of generous and enlightened readers will give us strength and encouragement to be more serviceable to the cause of sacred literature.

Sanskrit Poets,

G. Srirama Murty and I. Narasimha Murty.

(Translated by Sri K. Narasimha Raju)

VEMANA, THE REFORMER

Vemana lived at a time, when India was passing through the darkest period of her history. The Hindu society had been cut up into a thousand fragments. The educated classes were more ignorant than the uneducated masses. An extraordinary situation indeed! How much Vemana was irritated by this unnatural condition can be seen from his saying that a washerman is greater than an educated man.

In his own way, Vemana tried to show light to the society that was steeped in darkness. He condemned the social evils in the sharpest terms. He was not a mere wishful poet or an arm-chair philosopher. He led the active life of an avowed reformer and must have braved all the perils of an enthusiast. He was a precursor of Raja Rama Mohan Roy and Veeresalingam Pantulu. When a proper history of the reform movement in India comes to be written, he will, no doubt, occupy a very conspicuous place in it.

The Andhra masses have always had a spirit of veneration for Vemana. What the work of scholars has done, in the later years, is to enlighten the educated classes about the noble teachings and venerable personality of Vemana of whom they have been pitiably ignorant.

Sri G. Sriramamurty and Sri I. Narasimhamurty have rendered remarkable service to the cause of the Indian culture by translating Vemana's literature into the Sanskrit language which is the common heritage of every Indian. My admiration for Vemana's spirit of enquiry and love of an enlightened life has made me bold enough to undertake to render into English the verses not covered by Mr.C.P. Brown's translation. Even to a modern reader the verses of Vemana are really a treasure-trove of thought-provoking ideas.

K. Narasimha Raju.

आदरोक्तिः ।

इमौ वेमगीतारचयितारौ श्रीरामनृसिंहाभिधेयौ शतावधानिनौ (संस्कृतान्ध्रभाषयोरनर्गलनिरवद्याशुकविताप्रबन्धचातुरीधुरीणौ) उभय-भाषाप्रवीणौ (आन्ध्रविश्वविद्यालयप्राच्यभाषापट्टभद्रौ) श्री गद्वाल संस्थानास्थानकविवरेण्यौ (महाराज्ञ्या आदिलक्ष्मीदेव्याः परिपालनकाले युवराजा साहेब कृष्णराममूपालेन गौरवसमर्पितास्थानकवियोग्यतापन्नौ) व्यासप्रोक्तसंस्कृतभागवतसंहितां सलक्षणया शैल्या यथातथमान्ध्रभाषायां पद्यकाव्यरूपेणानूद्य चरितार्थतां प्राप्तौ व्यासप्रणीतमहाभारतमध्यभागस्थितां भगवद्गीतां (पूर्वगीतां उत्तरगीतां च) यथावदान्ध्रभाषायां तेटगीतपद्येषु अनूद्य च स्वप्रतिभां आध्यात्मिकानुभूतिं च प्रकटयामासतुः। अपि च महात्मा गान्धी (परिष्कृतश्रीकृष्णावतारतत्त्वम्) इत्याख्यं खण्डकाव्यं स्वतन्त्रभावैः संस्कृतभाषायां विरच्य स्वकीयं भावगाम्भीर्यं सहृदयेभ्योऽदर्शयताम्। एवमेतौ सहृदयलोकस्य इतःपूर्वमेव सुपरिचितौ।

पञ्चदशशताब्दे आन्ध्रयोगी वेमनाख्यः स्वकीययाऽनुभूत्या तत्कालस्थसांघिकदुराचारान् उद्घाट्य आर्थिकव्यावहारिकनैतिक-आध्यात्मिकादिविषयान् संस्करणपूर्वकं यथेच्छमान्ध्रभाषायां आटवेलदि-पद्यरूपेण जगौ। तेषु वेमनकविगीतेषु आटवेलदिपद्येषु प्रथमसहस्रं संस्कृतीकृत्य प्रकटय्यच यावत्प्रपञ्चेऽपि वेमनयोगिवरस्य निरुपमां प्रतिष्ठां सम्पादितवन्तौ इमौ श्रीरामनृसिंहमूर्तिकविवरौ अतीव प्रशंसनीयौ ।

अनयोरेवंभूता वेमगीता स्थालीपुलाकन्यायेन मया पर्यवलोकिता। संस्कृतभाषायामनुवदितायाः एतयोर्वेमगीताया अनुवादसौष्ठवं (समूलप्रचुरणात्) विज्ञानां विशदमेव भवति। ततः तदुद्घाटनमप्रस्तुतमिति मन्ये। इयं वेमगीता यासु यासु भाषासु व्याख्याता भवति तत्तद्भाषावेत्तृभिः तत्प्रतिभा सुविदिता भवति। अथ वेमनयोगिनो जीवितं,

साहिती, तद्व्याप्तिः इत्येते अन्ये च अंशा ग्रन्थकर्तृभ्यां कथितपूर्वा एव। ततः पुनरुल्लेखनं चर्वितचर्वणमेव स्यात्। एतत् प्रथमं श्लोकसहस्रं प्रसङ्गशुद्धिविराजमानं सम्यक् मनः प्रविश्य मानवं अज्ञानान्धतमसात् निवर्त्य हृदयपरिवर्तनेन सत्पथानुगामिनं कर्तुं सर्वदा शक्नोतीत्युक्तिर्निर्विवादैव।

प्रभावप्रकटनार्थं प्रगल्भवचांस्युक्त्वा वृथा कल्पितबिरुदानि धृत्वा पामरजनपठनीयानि यानि कानिचित् शृङ्गारकाव्यानि विरच्य कोलात्मनः प्रभून्प्रजाश्च वशीकृत्य धनं हृत्वा दुरभ्यासवशंगतानां शृङ्गारकवीनां मध्ये एतादृशामाध्यात्मिकसत्कवीनां स्थानं न लभेतेति नग्नसत्यमेव। तथापि पद्यपद्यकवितयोः भक्तिज्ञाननिजानुभूतिकलिताध्यात्मिकतत्त्वमोदित्थतभावतरङ्गैः आत्मानन्दायैव स्वयं गानं कृत्वा मुक्तिपथं गतौ आन्ध्रदेशीयौ त्यागयवेमनाख्यौ पुण्यपुरुषौ भासेते। तथैव प्रकृतकवी स्वसुखायैव स्वरचना इति प्रकटयन्तौ अचिरादेव संस्कृतान्ध्रयोः अनेकान् उद्ग्रन्थान् रचयित्वा सर्वेषामपि अभिनन्द्यौ भवतः। जातिमतबाह्यन्यायधर्मसत्यप्रतिपादनायैव उद्दिष्टः अयं ग्रन्थः जनानां मौढ्यतमो निवारयति। नात्र संशयः।

आन्ध्र्यां तत्रापि व्यावहारिकभाषायां पामरजनसुबोधार्थं पण्डितजनानामपि दुरवगाहानि तत्त्वरहस्यानि निक्षिप्य स्वप्रतिभावेमनयोगी विशदयामास। व्यावहारिकभाषातः संस्कृतानुवादः अतिक्लेशजनक इति तद्विदां विदितमेव। तमिमं क्लेशकरमनुवादं श्रीरामनृसिंहमूर्तिकवी सहृदयहृद्यं यथातथा साधयामासतुरिति वक्तव्यम्।

तथाचानयोः सकलभाग्यसन्धानाय भगवन्तं प्रार्थयन् साञ्जलिबन्धमेतौ अभिनन्दये च।

I. Narayanaswamy, M. A.,
MAHARAJA'S COLLEGE. VIJAYANAGARAM

ॐ

श्री वेमनयोगीन्द्राय नमः।

श्री वेमगीताप्रथमसहस्रे उत्तरार्धम्।

समूलं, श्री कलिदिण्डि नरसिंहराजकृतांग्लविवरणसङ्कलितं च।

श्रीरामनृसिंहमूर्तिकविकृत श्री वेमनयोगीन्द्रस्तुतिः।

श्री निस्तुलानन्दवने चिदभ्र-
रथ्यासु चाध्यात्मिकगीतिलोल!।
वेमान्ध्रभाषाकविकोकिलाद्य-
देह्युत्तरार्धप्रथनेऽपि शक्तिम्॥

O Cuckoo-throated Andhra-Poet Vema,
Who sang your honey-winged songs
In the garden of bliss, in the promenades of wisdom,
Give us strength to bring out the second part too.

—• नैतिकविभागः •—

501. औनटंचु नोकडाडिनमाटकु, गादटंचुनल्क क्षणमुपट्टु।
दानिनिश्चयीय दातलुदिगवले, विश्वदाभिराम विनुर वेम!॥

साधुनिर्धारितोक्तेश्च नेति गर्हा क्षणाद्भवेत्।
तां तु वेम! स्थिरीकर्तुमवतीर्णाः पितामहाः॥५०१॥

—: Moral Section :—

Easy it is for one to agree,
And equally easy for another to disagree;
But to prove the truth of a saying,
The dead should come to life again. 501.

Part II English translation By *Sri K. Narasimha Raju*.

502. तनदु बागुगोरि धर्मंबु जेप्पिन, दिट्टुचुंद्रु मोरकु लेट्टयेदुट ।
गड्डिवेय बोट्टगोड्डु कोम्माडिंचु, विश्वदाभिराम विनुर वेम ! ॥

श्रेयो विचिन्त्य सर्वेषां वेम ! धर्मं ब्रुवन्ति ये ।
तान्निन्दन्ति खला धूर्तो हिनस्ति तृणदं वृषः ॥५०२॥

Bless a fool and teach him his duty;
The reward for your labour is his abuse;
An ill-tempered bull threatens to gore
His own keeper when he brings him feed. 502.

503. बहुळकाव्यमुलनु बरिकिंपगावच्चु, बहुळशब्दचयमु बलुकवच्चु ।
सहनमोकटब्ब जालकुंडुरा, विश्वदाभिराम विनुर वेम ! ॥

अनेककाव्यपठनं बहुशब्दाभिभाषणम् ।
कथञ्चिच्छक्यते वेम ! दुर्लभा हि सहिष्णुता ॥५०३॥

Many a book, may he read;
And many a tongue, may he speak;
Yet a savant finds it hard
To cultivate tolerance. 503.

504. झषमु नीरुवेडल जच्चुटे सिद्धंबु, नीटनुंडेनेनि निगिडिपड्डनु ।
अण्ड तोलगु नेडल नंदरपनि यिंते, विश्वदाभिराम विनुर वेम !॥

निर्गतस्सलिलान्मत्स्यो म्रियते नात्र संशयः ।
जलस्थः प्लवते वेम ! तथा सर्वे निराश्रयाः ॥५०४॥

The fish in water is playful and gay;
Poor thing! if taken out at once it dies;
Such is the fate of those
Who are thrown out of their fold. 504.

505. ऐकमत्य मोकडाव्श्यकं बेप्डु, दानिबलिमि नेंत्रयैन गूडु ।
गड्डिवेंटि बेट्टि कट्टरा येनुगुन् ?, विश्वदाभिराम विनुर वेम! ॥

मुख्यं वेमैकमत्यं स्यात्तद्बलेन महत्फलम् ।
रज्जुं कृत्वा शुष्कतृणैः किं न बध्नन्ति सामजम्? ॥५०५॥

Unity need be preserved always;
The greatest deeds are wrought by it;
The fragile straws, when twined into a rope,
Can hold an elephant by the throat. 505.

506. ईतवच्चिनपुड्डु लोतनिपिंचुना ?, पातदोषि करय भयमु कलदे ? ।
कोति कोम्मनेक्कि कुप्पिंचि दूकदा ?, विश्वदाभिराम विनुर वेम! ॥

नाऽगाधताभयं वेम! तरणोपायशालिनः ।
प्राग्दोषिणस्तु किं भीत्या? कपिश्चंक्रमते न किम्? ॥५०६॥

The swimmer swims in the deep;
The monkey hops on the tree;
The culprit does his wonted crime;
Habit acts as Nature's maid. 506.

507. व्याधि नेरुगलेनि वैद्यमदेलरा?, कोदुव देलियलेनि कोर्कुलेल? ।
मनसुदेलियलेनि मर्मज्ञुलेटिकि ?, विश्वदाभिराम विनुर वेम! ॥

किं वैद्येनाऽगदज्ञेन ? किमलोपज्ञकांक्षया ? ।
चित्ताऽनभिज्ञैः किं? वेम! मर्मज्ञैः पूरुषैर्भुवि ॥५०७॥

Like treatment, knowing not the patient's ailment,
And a wish, knowing not the wisher's want
Of what avail is all the esoteric wisdom
When the ways of the mind are not known? 507.

508. लवणमेंत दानिलाभंबुगननेंत, कोद्दिदनुचु नेव्वगूडुनय्य ? ।
भोगमेटिकि नुपभोगंबे लेक्कगु, विश्वदाभिराम विनुर वेम ! ॥

लवणं स्यात्कियद्वेम ! तल्लाभस्तु कियानिति ।
नं मन्तव्यो हि भोगैः किं? फलं स्यादुपयोगतः ॥५०८॥

A pinch of salt, though small in quantity,
Does render a great service;
Bulk is not what counts for greatness;
Utility is the mother of worth. 508.

509. औननंगवच्चु नैनदिकानिदि, यन्युवेदुटनुंडि यडुगडेनि ।
निलिचि यडुगुवाडु गलिगिन निलुवडु, विश्वदाभिराम विनुर वेम!

यद्यग्रेऽन्यो जनस्स्थित्वा न पृच्छेत् साध्वसाध्वपि ।
साध्वित्येव वदेद्वेम ! यदि प्रष्टा न तिष्ठति ॥५०९॥

True or untrue, one may say
Ay or nay, when none disputes;
When a sage arrives to speak his mind,
The pretender has to sneak behind. 509.

510. फणिकि गोरलुंड भयमोंदुनट्टुले, वेरतुरय्य दुष्टविभवमुनकु ।
गोरलूड द्राचु मीरुना ? दुष्टत, विश्वदाभिराम विनुर वेम! ॥

अहेरिव क्रूरदंष्ट्रात् त्रसेयुः दुष्टवैभवात् ।
दौष्ट्यं वेम ! कथं तिष्ठेत् ? वीतदंष्ट्रफणाभृतः ॥५१०॥

Of a snake with fangs are all afraid,
A knave with wealth is thus feared;
Remove the wealth, as the fangs are pulled,
In no time, does the knave grow mild. 510.

511. नूरुबलुकबच्चु नुडि बायगा रादु, वातकन्न साक्षि वलदु देन्न ।
परग लेनिवात भंगपाटुनु देच्चु, विश्वदाभिराम विनुर वेम ! ॥

वचश्शतं वेम ! वाच्यं नैकं लेख्यं मनागपि ।
साक्ष्यं न युक्तं लेखाया असल्लेखा तु हानये ॥५११॥

A hundred untruths you may be wont to speak;
Let be what you write atleast a truth;
One written word that can't be proved
Is enough to ruin an innocent mind. 511.

512. दरिनिनुन्नवाडु तप्पक दक्षुंडु, एडमपडिनवाडु दुडुकुगड्डु ।
अनुसरिंचुवारि कटयेडु गार्यमुल्, विश्वदाभिराम विनुर वेम ! ॥

दक्षो नूनं समीपस्थः प्रौढो दूरस्थलस्थितः ।
ये चरन्त्यनुसृत्येह वेम ! सिध्यन्ति तत्क्रियाः ॥५१२॥

One at hand is treated as capable,
And one afar is considered haughty;
To have his ends achieved,
Man should be a hanger-on. 512.

513. कारु कारु गुरुलु कागुणितमु जेप्प, शास्त्रपाठमुलनु जदिवि चेप्प ।
मुक्तिदारि जूपु मूलमे गुरुडगु, विश्वदाभिराम विनुर वेम! ॥

न कागुणितबोधेन न शास्त्राध्यापनेन च ।
भवन्ति गुरवो वेम ! स्याद्गुरुर्मुक्तिदर्शकः ॥५१३॥

Think not that he who teaches the alphabet,
Or he who instructs in the sciences,
Is worthy of the name of Teacher;
The real Teacher is he who leads to liberation. 513.

514. द्वारबंधमुनकु दलुपुलु गडियलु, वलेने नोटि कोप्पुगल नियतुलु ।
धर्म मेरिगि पलुक धन्युडौ भुविलोन, विश्वदाभिराम विनुर वेम!॥

कवाटाश्चार्गला वेम! द्वारबन्धे यथा स्थिताः ।
तथा वक्त्रस्य नियमाः धन्यस्स्याद्धर्मवाचकः ॥५१४॥

A cultivated speech unto the mouth
Is what the doors and bars are unto a gate-frame;
Blessed is he whose words do spring
From a deep devotion to universal good 514.

515. छुरिकतोड गोय जोप्पडुनेकानि, दानिपिडिनिगोय दरमे? नीकु ।
देलिविलेनि मेनि बलि मेमिचेयुनु?, विश्वदाभिराम विनुर वेम!॥

छुरिका कृन्तने दक्षा तत्सरुर्न तथा मनाक् ।
विना ज्ञानेन किं कुर्यात्? वेम! शारीरकं बलम् ॥५१५॥

It is the blade of a knife that cuts,
Not the handle though strong and long;
It is intelligence that helps man to live well,
Not the bulk and strength of his body. 515.

516. सकलविद्यलंदु संपन्नुलैयुन्न, नट्टिवारु परिचयमुन जौक ।
पेरटिचेट्टुमंदु बरिकिंप मेचरु, विश्वदाभिराम विनुर वेम! ॥

सर्वविद्यासु सम्पन्ना ये ते परिचयात्सदा ।
लघवो वेम! नेहन्ते प्रान्तवृक्षभवौषधम् ॥५१६॥

Though a man is highly learned,
Through familiarity his value falls;
A potent herb, in the backyard found,
Is not counted for its medicinal worth. 516.

517. मंचिनीरु बोय मल्ले पूयुनुगानि, फलितमोनरुटेट्लु? पनिजोरमिनि।
वंटजेय केट्लु वंटकमव्वुनु ?, विश्वदाभिराम विनुर वेम ! ॥

जलासेकाद्विम! मल्ली पुष्पयुक्ता भवेत्खलु।
अक्रियस्य फलं कुत्र चापाकादोदनं कथम् ? ॥५१७॥

No jasmin can be made to blossom
Without careful watering;
No food can be had without proper cooking;
And no great deed can be achieved without
persevering. 517.

518 कसवुनु दिनुवाडु घनफलंबुलरुचि, कानलेडुकादे ? वानियट्लु।
चिन्नचदुवुलकुनु मिन्नज्ञानमु रादु, विश्वदाभिराम विनुर वेम ! ॥

रसं फलानां स्वादूनां तृणखादी न वेत्ति हि।
तथा वेमाल्पविद्यानां ज्ञानं भवति नाधिकम् ॥५१८॥

An eater of grass knows not
The taste of delicious fruit;
A man of meagre education
Cannot hope for extensive knowledge. 518.

519. तल्लियुन्नयपुडे तनदुगारावमु, नामे पोव दन्नु नरय रेवरु।
मंचिकालमपुडे मर्याद नार्जिंचु, विश्वदाभिराम विनुर वेम! ॥

यद्यस्ति माता वेमाऽऽस्ते लालना स्वस्य तन्मृतौ।
न कोऽपि पश्यत्यात्मानं काले गौरवमार्जय ॥५१९॥

Waste not your youth, the motherly fodndler of
your hopes;
But a noble end, through her favour, achieve;
When the loving mother is dead,
The child is left to his lonesome fate. 519.

520. गट्टुमीदुन्न गानिपचु सर्वमु, देलिसितेटबाडिन देलियुनेल्ल ।
लोकविषयमुलनु लोनिरहस्यमुल, विश्वदाभिराम विनुर वेम ! ॥

दृश्यते हि तटस्थेन सर्वं वेद्यं च वेद्यते ।
वेमैवं लोकविषया ह्यन्तर्गुह्याश्च तत्त्वतः ॥५२०॥

What lies on either side
Can be seen by him alone,
Who stands on an embankment;
So he who ascends wisdom's pinnacle
Can see the secrets
Of the inner and outer worlds. 520.

521. टंक मतुककुन्न बोंकुबुगा रादु, स्वर्णभूषणंबु जगमेरुंग ।
भट्टु वेंटलेक प्रभुवु शोभिंचुना ?, विश्वदाभिराम विनुर वेम ! ॥

टङ्कसन्धानरहितं न साधु स्वर्णभूषणम् ।
भटेन रहितो वेम ! किं प्रभुस्साधु शोभते ? ॥५२१॥

A jewel of gold will not be whole,
Unless its parts are joined with solder;
The ruler's virtues do not shine,
Unless his adviser holds them together. 521.

522. मेककुतुकबट्टि मेडचन्नु गुडुवगा, नाकलेल्लमानु ? नासगाक ।
लोभिवानि नडुग लाभंबुगल्गुने ?, विश्वदाभिराम विनुर वेम ! ॥

धृत्वा मेषगलं वेम ! पिबेद्यदि गलस्तनम् ।
न क्षुन्निवृत्तिर्व्यर्थाशा लोभियाच्ञा तथा वृथा ॥५२२॥

One may suck by holding fast
The skinny nipple of a nanny's neck,
The hunger wont be appeased;
One may beg at the doors of a miser,
The want will not be satisfied. 522.

528. मुनु देलिपिनवारु मुदनहमैरिळ, तिरिगिचेप्पितनुचु दिट्टरुदु।
तेलिय जेप्पिन मरि तेलिसिकोलेरया, विश्वदाभिराम विनुर वेम !!

प्राग्बोद्धारो विनष्टास्स्युः पुनः ब्रूते भवानिति।
न निन्देत्सुप्रोक्तमपि वेम! न ज्ञायते हि तत् ॥५२३॥

Curse me not for preaching again
What the ancients taught with all their main;
Are not people too dull to know
Though taught over and over anew?. 523.

524. नीति देलियजेप्पि निजमुग वेमन, पातकमुलनेल्ल बारबेट्टे।
लोतुतत्त्व मरसि लोकुल्कुनु जेप्पे, विश्वदाभिराम विनुर वेम !

नीतिमुद्घाट्य वेमाख्यो न्यषेधत् पातकानि च।
अगाधतत्त्वं लोकानां वेम! सम्यक् न्यबोधयत् ॥५२४॥

By teaching the rule of righteous conduct,
All the sins has Vemana dispelled;
Diving deep into the philosophical lore
Has he brought out wisdom for the common man.

—• सांस्कृतिकविभागः •—

525. गुरुबृहस्पतियुनु गुणमिंचुकयु लेक, चंद्रमामकिच्चे शापमपुडु।
गुरुडु कोपमूनकूड देन्नटिकिनि, विश्वदाभिराम विनुर वेम ! ॥

गुरुर्बृहस्पतिश्चेन्दोर्ददौ शापं हि निर्गुणः।
कदापि वेम! स्वे चित्ते गुरुः क्रोधं न धारयेत् ॥५२५॥

—: Cultural Section :—

Even Brihaspati, the priest of Gods,
Lost his balance and cursed the Moon;
Never should a teacher of men
Entertain anger against any one. 125.

526. आत्मनेरुगनि स्तुति नट्टिट्टुजेसिन, वानिमेच्चुवाडु नट्टिवाडे।
मुक्किडिदियु बाड मूलुंडु मेचडा, विश्वदाभिराम विनुर वेम ! ॥

स्तुतिं करोत्यनात्मज्ञो यस्तच्छ्लाघी जडस्स हि ।
गायन्तीं श्लाघते छिन्नदां न किं वेम! जडो जनः?॥५२६

When a noseless jade, her music sings,
A noodle nods his head in joy;
When a wily flatterer gives his praise,
A fool alone does feel elated. 526.

527. खरमुपालुदेचि काचि चक्करवेय, भक्ष्यमगुने ! येश भ्रष्टुडट्टुले।
एंतयेनिजेप्पि येसगिन बोसगुने ?, विश्वदाभिराम विनुर वेम ! ॥

सम्पच्य गार्दभक्षीरं यदि शर्करया प्लुतम् ।
भक्ष्यं भवेत्किम्? मूर्खोऽपि वेमार्यो न तथैकदा ॥५२७॥

The donkey's milk is bad to drink,
Though boiled, and sweetened with suger;
Teach and preach a depraved man,
You cannot make him pure and sane. 527.

528. पोट्लकाय रायिपोदिगि कट्टनुगट्ट, लीरुगोड वंक लेक पेरुगु।
कुक्कतोक गट्ट गुदुरुना चक्कगा, विश्वदाभिराम विनुर वेम ! ॥

ऋजुतामश्नुते रज्ज्वा शिलाबद्धा पटोलिका ।
तथा बद्धश्शुनः पुच्छः त्यजेत्किं? वेम! वक्रताम् ॥५२८॥

A crooked snake-gourd becomes straight,
If a stone is hung by a thread at its end;
Even this good device will have to fail
If applied to straighten a dog's tail. 528.

529. बंडबूतुलाडु परमनीचुंडैन, दंडिआरिगोप्प तानेरुगुने ?।
चंदनंबुघनत पंदि येमेरुगुनु ?, विश्वदाभिराम विनुर वेम ! ॥

अवाच्यवादी नीचात्मा सतां जानाति किं प्रथाम् ? ।
वेम ! चन्दनसाररम्यं किं वेत्ति ग्रामसूकरः ? ॥५२९॥

A boor with a filthy tongue,
Can pour his abuse on the great;
But their greatness he cannot know;
How can a swine divine the worth of sandle paste ?

530. कुलमुनीरुजेसि गुरुवुनु वधियिंप, बोंकग नेनुगनुचु बोंकु बोंके ।
पेरु धर्मराजु पेनुवेपविच्छ्र, विश्वदाभिराम विनुर वेम ! ॥

गज इत्यनृतं प्राह गुरुं हन्तु कुलं दहन् ।
वेम ! नाम्ना धर्मराजो निम्बबीजोपमः खलु ॥५३०॥

His race he killed in a gruesome war;
To strike his teacher dead with grief,
He lied and cried "Aswaddhama died"
Sweetly Dharmaraja's name denotes dharma;
In truth, he is but a bitter rogue. 530.

531. विन्नमुद्दिकोंत विननि मुद्दुल कान्नि. विन्नदुद्दुलेन्नो विनगजेप्पु ।
तानु गन्नयट्टे दाम्भिकुंडेप्पुडु विश्वदाभिराम विनुर वेम ! ॥

किंचिच्छ्रुतं दाम्भिकस्तु किंचिदेवाऽश्रुतं वचः ।
चित्रं चित्रं वदेद्वेम ! साक्षाद्दृष्टमिवाऽधिकम् ॥५३१॥

The hypocrite's way is to say,
Some tales he has heard,
And some he has not,
As If he has seen them all with his eye. 531.

532. पुडमि दिरिगि पडयु पुण्यंबु लेल्लनु, कल्गु साधुजनुल गाञ्चयुडे ।
पडिननीरु नदिनि गड्डतेटयैयुंडु, विश्वदाभिराम विनुर वेम ! ॥

देशाटनेन यत्पुण्यं दर्शनेनैव तत्सताम् ।
पतितं सलिलं वेम ! नदीसङ्गाद्धि निर्मलम् ॥५३२॥

More merit than comes from pilgrimage
Round and round about the world
Can be earned by visiting great souls
Ennobling like rivers, which precipitate the impure.

533. बंटुवलेनु लेव बण्डितंमन्युंडु, साधुपंडितुंडु शांतुडगुनु ।
कुक्क मोरुगा नेमि गुर्रमुनकु लेक ?, विश्वदाभिराम विनुर वेम! ॥

उत्थिते पण्डितम्मन्ये भटवत् वेम ! पण्डितः ।
शान्तो भवेत्स्यादश्वस्य का ? हानिर्भषता शुना ॥५३३॥

If a pseudo scholar blusters and babbles,
Let the true savant be calm and silent;
When a low-bred dog barks and bounces,
The valiant horse need not be perturbed. 533.

534. मालकलियलकु मंचिरूपंबुन, मुट्टेने ? त्रिशंकुपट्टि नाडु ,
कानिपनुल जेय घनुलासपडुदुरा ?, विश्वदाभिराम विनुर वेम ! ॥

चण्डालकन्यासौरूप्यं, दृष्ट्वा त्रैशङ्कवः पुरा ।
न मेने वेम ! नेच्छन्ति ह्यकार्यकरणं घनाः ॥५३४॥

The charms and entreaties of the low-born beauties
Could not entice into misdeeds
King Harischandra, son of Trisanku;
True nobility yields not to low temptations. 534.

585. विद्यलेनिवाड्डु विवुधुल सभलोन, नुंडगाने पंडितुंडु गाड्डु ।
कोलनिहंसलकड कोक्केरयुन्नट्लु, विश्वदाभिराम विनुर वेम !

विदुषामन्तिके वेम ! विद्याहीनो वसेद्यदि ।
न विद्वान् भवितुं योग्यो हंसमध्ये बको यथा ॥५३५॥

An unschooled rustic does not turn a pandit,
By sitting in an assemblage of scholars,
But looks like an odd crane
In a pool full of swans. 535.

586. व्याधि कलिगेनेनि वैद्युनिचेतनु, मंदुदिनककानि मानदेंदु ।
चेंत दीपमिडक चीकटि पायुना, विश्वदाभिराम विनुर वेम ! ॥

यदि व्याधिर्भवेद्देहे नापैति ह्यौषधादृते ।
वेम ! तन्निकटे दीपमकृत्वाऽपैति किं तमः ? ॥२३६॥

A bodily ailment can't be cured
Without the help of a physician's potion ;
Darkness can't be dispelled without light;
Ignorance can't be quelled without wisdom. 536.

587. छत्रमुन दगिन छाय येर्पडुचुंडु, शास्त्रमेरुग दगिन ज्ञान मोदवु ।
जन्म युत्रवानि कंड युंडुनुगद !, विश्वदाभिराम विनुर वेम ! ॥

छत्रे स्थिते भवेच्छाया ज्ञानं स्याच्छास्त्रदर्शने ।
जनके च स्थिते वेम ! स्वाश्रयो विद्यते खलु ॥५३७॥

Like a father who his children protects,
Like an umbrella which gives a way-farer shade
The noble books that deal with sciences
Bestow wisdom on their diligent readers. 537.

538. चीमु कारुपंट जेदलु पट्टिन यिंट, पुरुगुपुट्टुगुंट बुसुलकंट ।
विड्डुचीकुचंट बिगियुंडनेचुना ?, विश्वदाभिराम विनुर वेम ! ॥

शिथिले दति दृष्येऽक्ष्णि वेम ! गेहे घुणान्विते ।
कृमिगर्ते स्तने पीते दार्ढ्यं किं साधु तिष्ठति ? ॥५३८॥

Beauty, after its creative service, resembles
A festering tooth and a suppurating eye,
A house infested with swarms of termites,
And a pool of water full of worms. 538

539. काननंबु जेरि कडुश्रम नोंदिन, यानलुडु राज्यमोंदे मरल ।
गष्टमुलकु नोर्व गश्गवा सुखमुलु ?, विश्वदाभिराम विनुर वेम ! ।

वनं गत्वा श्रमक्लिन्नः प्राप राज्यं ततो नलः ।
सहते वेम ! कष्टानि यस्स सौख्यानि विन्दते ॥५३९॥

The heroic soul that faces tribulations
With an unflinching zeal and perseveres,
Will achieve its aim, as Nala regained
His crown after suffering in wilderness. 539

540. वसुधनेड्डकेल वैद्यकार्यंबुलु ?, ग्रुड्डिवानिकेल गुगुगुपरुगु ? ।
बुड्डवानि केल पो गुप्पिगंतुलु ?, विश्वदाभिराम विनुर वेम ! ॥

अशुचेः किं वैद्यकार्यैः ? किमन्धस्य प्रधावनैः ? ।
बृहदण्डयुतस्यापि किं वेमाऽऽशुविलङ्घनैः ? ॥५४०॥

Like a blind man trying to run a race,
And a deformed cripple, to jump up high,
One with unclean habits reposes
One's faith in the magic of physician's dose. 540

